शब्द–ब्रह्म
E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका 17 मई 2020
पीअर रीव्यूड रेफ़्रीड रिसर्च जर्नल

# गीतायाः कर्मयोगस्य वर्तमानकाले प्रासङ्गिकता

अनुराधा (शोधार्थी)
केन्द्रीय संस्कृत विश्वविद्यालय
वेदव्यास-परिसर
बलाहर, कांगड़ा, हिमाचल प्रदेश, भारत

शोध संक्षेपः

*भारतीय संस्कृतेः प्राणभूतः ग्रन्थः वर्तते श्रीमद्भगवद्गीता। अयं हि ग्रन्थ सर्व भारतीय ग्रन्थानामुपनिषदाञ्च सारः। अत्र उपनिबद्धाः विचारा एव मानवान् शिक्ष्यन्ति यत् उत्तमतया जीवनं कथं जीवनीयम्। जीवनसम्बद्धः कश्चन अपि विषयः तादृशः नास्ति यः अस्मिन् पवित्रग्रन्थे न वर्णितः। अत्र उपनिबद्धाः कल्याणकारिण अज्ञानविनाशाकोपदेशाः मानवजीवने विभिन्नमार्गेषु मनुष्याणाम् अनवरतं मार्गदर्शनं कुर्वन्ति। भगवता श्रीकृष्णेन प्रतिपादितेषु उपदेशेषु कर्मयोगस्य उपदेशः अत्यन्तं महत्त्वपूर्णः ज्ञानसागर इव वर्तते। अस्यां पृथिव्यां सर्वं कर्मणामेव विधानमस्ति।*

***मुख्य शब्दाः*** - *ज्ञानकर्मयोगः, कर्तव्यनिष्ठा, ज्ञानमार्गः, फलासक्तिः, परमसिद्धिः, मिथ्याचारिजनाः*

## शोधः

भगवता यदा सृष्टिः रचिता तदा विश्वे कर्मणः एव प्रधानता कृता। मनुष्याः यादृशं कार्यं कुर्वन्ति तादृशमेव तस्य फलमपि प्राप्नुवन्ति। यथा रामचरितमानसे गोस्वामितुलसीदासः लिखति यत् - "कर्मप्रधान विश्व रचि राखा, जो जस करहिं सो तस फल चाखा।" इति।

श्रीकृष्णः गीतायां ज्ञानकर्मयोगयोः निरूपणसमये कर्मयोगं श्रेष्ठं वदति तथा च सर्वमनुष्येभ्यः कर्मानुष्ठानाय उपदेशं ददाति। भगवता अयमुपदेशः न केवलं मानवानां कृते दत्तः अपितु सः स्वयमपि अस्य पालनं करोति। ईश्वरः स्वयमपि विना कर्म कदापि न तिष्ठति। ईश्वरः सर्वशक्तिशाली, सर्वश्रेष्ठः च। सः न कस्यापि अधीनः, सः यदि इच्छेत् तर्हि नियमानां पालनं नापि कुर्यात् किन्तु सः कदापि एवं न करोति। ईश्वरः अपि निरन्तररूपेण सर्वान् नियमान् पालयति तथा च सर्वदा कर्मसु लीनः एव भवति। गीतायां स्पष्टरूपेण वर्णनं कुर्वन् श्रीकृष्णः स्वयं वदति यत् - "अहमपि अवधानेन सर्वाणि कार्याणि करोमि" यतोहि एते मनुष्याः सर्वविधविषयेषु मामेव अनुसरन्ति। तद्यथा–

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥[1]

प्रत्येकं मानवस्य इदं कर्तव्यमस्ति यत् सः शास्त्रविहितकर्माणि कुर्यात्, यतो हि कर्मणा विना तु शरीरयात्रा अपि सम्भवा नास्ति। सर्वपदार्थाः अस्मिन् जगति विद्यमानाः सन्ति, किन्तु कर्महीनः जनः तान् सकलान् पदार्थान् न प्राप्नोति। सकलपदार्थानां प्राप्तिनिमितं मानवेषु मात्रम् इच्छा एव नापेक्षिता अपितु कर्तव्यनिष्ठा अपि आवश्यकी, यतो हि परिश्रमेण एव कार्याणि सिद्ध्यन्ति, यथा उक्तमपि अस्ति–

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।[2]

यदि कश्चन एवं चिन्तयन्ति यत् मात्रं प्रभुभक्त्या एवं च संन्यासी भूत्वा ईश्वरः प्रसन्नःभविष्यति तथा सकलपदार्थान् दास्यति इति इदन्तु कदापि न सम्भवति एव। कर्मयोगेन एव मनुष्यः जीवने सफलता-सिद्धि-लाभादिकम् अन्ते च परमेश्वरं प्राप्नोति यथा उक्तमपि अस्ति यत् –

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तत् शृणु ॥[3]

केचन आडम्बरं कुर्वन्तः निजसामाजिकपारिवारिकादिदायित्वानां त्यागं कृत्वा ईश्वरस्य कृत्रिमभक्तिषु संलग्नाः भवन्ति। कर्मेन्द्रियैः ते प्रभुभक्तिं कुर्वन्ति किन्तु मनसा भोगविलासे एव संलिप्ताः भवन्ति। एतादृशजनान् तु स्वयं परमपिता अपि 'मिथ्याचारी' संज्ञां प्रददाति। गीतायां स्पष्टरूपेण कृष्णेन उक्तमस्ति

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥[4]

मिथ्याचारिजनाः कर्मयोगस्य महत्तां नावगच्छन्ति तथा च तेषाम् मनः कदापि कर्मसु लीनः न भवति एव । अस्मिन् संसारे तु प्रायशः ते जनाः यश-कीर्ति-सुख-समृद्ध्यादिकं प्राप्नुयुः किन्तु जीवनस्य अन्ते ते नरकमेव अधिगच्छन्ति। ईशावास्योपनिषदि अपि एतस्य एव मतस्य पुष्टिः कृता अस्ति। तद्यथा -

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृता।[5]

भगवान् न कदापि इच्छति यत् तस्य भक्ताः कर्मणां त्यागं कुर्युः। भगवन्तं तु तादृशाः भक्ताः प्रियाः सन्ति ये स्वकीय-सर्व-दायित्वानां निर्वहणं कुर्वन्तः परमपितुः स्मरणं कुर्युः तथा च स्वकीयानि कर्माणि तस्मै अर्पयेयुः। अत एव श्रीकृष्णः निजप्रियभक्तम् एवं मित्रमर्जुनमपि युद्धक्षेत्रे कर्म कर्तुं प्रेरयति।यथा–

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥[6]

अर्थात् हे अर्जुन ! भवान् क्लैब्यं मा प्राप्नोतु यतोहि अस्मिन् काले नास्ति प्रयोजनमेव क्लैब्यतायाः। अस्मिन् काले अयं व्यवहारः सर्वथा अनुचितः एतदर्थं हृदयस्य दौर्बल्यं त्यक्त्वा युद्धं कुरु तथा च क्षत्रियधर्मस्य पालनं कुरु। गीतायां लिखिताः ये सदुपदेशाः सन्ति ते न केवलम् अर्जुनस्य कृते एव अपितु सम्पूर्णमानवसमाजस्य कल्याणार्थं श्रीकृष्णेन उक्ताः सन्ति। एषां सदुपदेशानां पालनं कृत्वा सर्वे इहलोकपरलोकस्य च सुखं प्राप्य अन्ते मोक्षं प्राप्नुवन्ति। अस्माकं भारतीयसंस्कृतिः अपि अस्मान् सर्वदा कर्मं कर्तुं प्रेरयति। उत्तमानि कार्याणि कुर्वद्भिः अस्माभिः तु शतवर्षाणि जीवितुम् इच्छा करणीया यथा ईशावास्योपनिषदि लिखितमस्ति -

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥[7]

जीवनस्य परमलक्ष्यस्य सिद्धिनिमितं ज्ञानमार्गः कर्ममार्गश्च श्रीकृष्णेन उक्तौ। वस्तुतः मार्गद्वयमपि आवश्यकमेव। यतो हि अनयो एकस्यापि अभावे सति मानवजीवनं सुखी भवितुं न अर्हति। केवलमात्रेण ज्ञानेन अपि मुक्तिः न लभ्यते यतो हि कर्माणां त्यागं कृत्वा मात्रज्ञानार्जनेन कश्चन परमसिद्धिं न प्राप्नोति।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥[8]

इदानीं प्रश्नाः उत्पद्यन्ते यत् कर्माणि तु बन्धनस्य कारणीभूतानि भवन्ति तर्हि कीदृशानि कर्माणि कर्तव्यानि कीदृशानि च त्याज्यानि ? इत्यस्य उत्तरं गीतायां वर्णितमस्ति यत् केवलनिष्कामभावेन एव स्वकर्माणि कर्तव्यानि भवन्ति अर्थात् फलासक्तिः कदापि न भवेत्। यः मनुष्यः अनासक्तभावेन कर्माणि कुर्वन् निजसर्वकर्माणि ईश्वराय अर्पयति सः कदापि बन्धने न तिष्ठति, यथा अरविन्दस्य पर्णं जले भूत्वा अपि आर्द्रं न भवति। इन्द्रियाणि वशीकृत्य ये अनासक्तभावेन स्वकार्याणि सम्पादयन्ति ते जनाः तु जगति विरला एव। एतस्मात् श्रीभगवता अपि एतादृशजनाः उत्तमा; श्रेष्ठाः, विशिष्टाश्च उक्ताः सन्ति। एतादृशाः जनाः एव तस्य प्रियाः वर्तन्ते। संसारे अनासक्तजनाः एव अन्ते परमपिता-परमात्मानं प्राप्नुवन्ति। यथा - असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः।[9]

सांसारिकबन्धनेभ्यः मुक्तिनिमित्तं श्रीकृष्णस्य उपदेशोऽयं -

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥[10]

अर्थात् कर्मकरणे एव अधिकारः भवेत् फले कदापि न। कर्मफलस्य हेतुः न भवितव्यं तथाच कर्मणि आसक्तिः अपि न भवेत्। वर्तमानसमये अपि मनुष्यः यदि गीतायां दर्शितमार्गम् अनुसृत्य स्वकर्तव्यानि निर्वहति तर्हि सः स्वजीवनं सफलं सार्थकं च कर्तुं पारयति। कर्तव्यनिष्ठव्यक्तिःएव स्वस्य स्वसमाजस्य-स्वराष्ट्रस्य च विकासं करोति। प्राचीनकाले भारतदेशः समृद्धः एवं विश्वगुरुः आसीत्। एतस्य कारणम् एतदेव आसीत् यत् सर्वे स्वकार्याणि बहु उत्तमतया निर्वहन्ति स्म किन्तु अद्य समयः नास्ति तादृशः। वर्तमाने जनाः कर्तव्यानि विस्मृत्य केवलम् अधिकाराणां विषये चिन्तयन्ति। स्वाधिकाराणां याचना तु क्रियते सर्वैः किन्तु न अवगम्यते कर्तव्यम्। अस्मात् कारणात् सर्वत्र अद्यत्वे अव्यवस्था एव दरीदृश्यमानास्ति। काम-क्रोध-लोभ-मोह-माया-ईर्ष्या-अराजकता-चौरकार्यम-असत्य-भ्रष्टाचारेण देशः पूर्णतया विभज्यमानः अस्ति। नेता-शिक्षक-चिकित्सक-अभियन्तारः ये केपि स्युः सर्वैः अधिकाधिकं धनं तु इष्यते किन्तु कर्मनिष्ठता बहु न्यूना एव दृष्टिपथे आयति।

**निष्कर्षः**

वयं यदि स्वकीयं गौरवशालिनम् इतिहासं पश्यामः तर्हि ज्ञास्यामः यत् जनकदशरथ-राम-कृष्ण-ययातीत्यादयः राजानः यदा शासनं कृतवन्तः तस्मिन् समये प्रजा बहु सुखी प्रसन्नाः च आसीत् यतो हि एते सर्वे स्वकर्तव्यपालनेन सह यज्ञादिश्रेष्ठकर्माणि अपि कुर्वन्ति स्म। एते सर्वे नृपाः कर्मनिष्ठाः आसन् तस्मादेव इहलोके सुखं प्राप्य अन्ते मोक्षं प्राप्तवन्तः। आधुनिककाले अपि अस्माभिः तेषाम् अनुकरणं करणीयम्। अद्यत्वे अपि यज्ञादिकर्मानुष्ठानस्य आवश्यकता अस्ति यतो हि यज्ञादिकार्याणि तादृशानि श्रेष्ठकर्माणि सन्ति यैः मनसि सुविचार-श्रद्धा-भक्ति-स्नेहादीनां विकासः भवति।

एतादृशानि श्रेष्ठकर्माणि कृत्वा एव पुनः सम्पन्नता समृद्धिः च आनेतुं शक्नुमः वयम् नास्ति अन्यः कश्चन उपायः। वर्तमानसमये विद्यमानसमस्यानां समाधानमपि एतानि यज्ञादिश्रेष्ठकर्माणि एव सन्ति यथा सर्वाधिकविशालसमस्या प्रदूषणस्य निदानमपि पवित्रयज्ञादि एव। गीतानुसारं यः मानवः यज्ञं करोति सः निश्चयेन ऐश्वर्याभिवृद्धिम् इच्छितभोगान् च प्राप्नोति। एतद्विपरीतं ये मानवाः कर्महीनाः सन्ति, स्वकर्तव्यपालनं न कुर्वन्ति ते नष्टभ्रष्टाः भवन्ति। अद्यापि कर्मयोगस्य महत्ता अवगन्तव्या तथा व्यवहारे अपि अनुसरणं करणीयम्।

E ISSN 2320 – 0871
17 मई 2020

## सन्दर्भ सूची

*1 श्रीमद्भगवद्गीता, 3.23*

*2 पञ्चतन्त्रम्,2.138*

*3 श्रीमद्भगवद्गीता, 18.45*

*4 श्रीमद्भगवद्गीता 3.6*

*5 ईशावास्योनिषद्, 3*

*6 श्रीमद्भगवद्गीता,2.3*

*7 ईशावास्योपनिषद्, 2*

*8 श्रीमद्भगवद्गीता,3.4*

*9 श्रीमद्भगवद्गीता,3.19*

*10 श्रीमद्भगवद्गीता,2.47*

**संदर्भग्रन्थसूची**

*1 श्रीमद्भगवद्गीता, साधारणभाषाटीकासहितम्, गीता प्रेस गोरखपुर, 2013*

*2 ईशादि नौ उपनिषद्, शांकरभाष्यार्थ, गीता प्रेस गोरखपुर, 2015*

*3 ईशावास्योपनिषत्, तत्त्वविवेचिनी हिन्दीव्याख्यासहित, व्याख्याकारः - स्वामी त्रिभुवनदास, चौखम्बा सुरभारती प्रकाशन, वाराणसी*

*4 पञ्चतन्त्रम्, श्रीश्यामाचरणपाण्डेय, मोतीललाल बनारसीदास प्रथम संस्कारण,वाराणसी।*